स्थितेः २२ महोल्कयेति महाज्वालाचत्याशक्त्यापृथक् यद्वा तत्रामशक्त्यापृथक् २३ सिंहेति उत्त रार्धस्यतथापीत्यादिः निर्घातनिःस्वनः उत्पातध्वनिःजितचानितस्यशुंभसिंहनादमितिशेषः २४ शुंभेति अनेनदेवीशुंभयोःसमयुद्धमुक्तं २५ ततइति अभितःसमंतात् २६ ततइति शुंभम्

३४

पुनरिति इतो पुत्रोपिदितिजसमानपीलत्वादितिजः २८ ततइति दुर्गासेवकदेव्या तैः पीडयानापनीतिपि
निमग्नयः २१ ततइति दैत्यसेनयासमावृतः २२ शूलेति समायांतसमुत्वेयांत वेगाविद्धेनवेगास्थितेन २४
३१ समवदिति महत्सेनसर्वविशेषणं २६ ततइति उग्रमितिक्रियाविशेषणं कालीशिवदूतीचचखादेत्य

पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः चक्रायुधेन दितिजश्छादयामास चंडिकां २० ततो भगवती
दुर्गा दुर्गार्तिनाशिनी चिच्छेद तानि चक्राणि स्वशरैः सायकाश्च तान् २१ ततो निशुंभो वेगेन ग
दामादाय चंडिका अभ्यधावत वै हंतुं दैत्यसेनसमावृतः २२ तस्यापतत एवाशु गदां चिच्छेद चंडिका
खड्गेन शितधारेण स च शूलं समाददे २३ शूलहस्तं समायांतं निशुंभममरार्दनं हृदि विव्याध शूले
न वेगाविद्धेन चंडिका २४ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोपरः महाबलो महावीर्यस्तिष्ठेति
पुरुषो वदन् २५ तस्य निःक्रामतो देवी प्रहस्य स्वनवत्ततः शिरश्चिच्छेद खड्गेन ततोसावपतद्भुवि
ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथा काली शिवदूती तथापरान् २७ कौमारी
शक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ब्रह्माणीमंत्रपूतेन तोयेनान्ये निराकृताः २८ माहेश्वरीत्रिशू
लेन भिन्नाः पेतुस्तथापरे वाराहीतुंडघातेन केचिच्चूर्णीकृता भुवि २९ खंडं खंडं च चक्रेण वैष्णव्या दा
नवाः कृताः वज्रेण चैंद्रीहस्ताग्रविमुक्तेन तथापरे केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् भक्षि

नयः २५ निराकृताश्च तामेत्रोचमन्यावः ३१ खंडं खंडं खंडं खंडप्रकाराः खंडस्य खंडशाबाधस्तोक्रियायां तु
याकृताः आद्येप्रकारे गुणावचनस्येतिद्वित्वं वज्रेणचाखंडखंडकृतारसेव ३० विनेशुर्नष्टाः नष्टाः पलायि
ताः ३१ इति श्रीशिवभट्टसुतनागोजीभट्टकृते सप्तशतीव्याख्याने नवमोध्यायः ९

दु. टी. मा. ४४

ऋषिरुवाच निशुंभमिति भ्रव्रीति प्राणदेवीमितिपोव: १ बलेति बलगर्वात् दुर्विनीते न दुर्गे गर्वमावह यातिमानिमा
निनीसती अन्यासां बलमाश्रित्य युध्यसे इत्यन्वयः २ देव्युवाच एकैवेति एकाग्रगतभेदहीना परमात्मरूपतान्
अपरा या मम सहायभूता द्वितीया का अस्ति न कापीत्यर्थः अनुभूयमानस्य भेदेन वाक्ये बहुमाह पश्यैति वाक्यं
विस्मकर्मत्वमद्विभूतयः इत्यनेन भेदं निरस्यति ३ ततइति ततो शरीरे लयमगमत् गृहभावम् अनेक ब्रह्माणीप्रमुखा

ऋषिरुवाच निशुंभं निहतं दृष्ट्वा भ्रातरं प्राणसंमितं हन्यमानं बलं चैव शुंभः क्रुद्धोब्रवीद्वचः १ बलाव
लेपात् दुष्टे त्वं मा दुर्गे गर्वमावह अन्यासां बलमाश्रित्य युध्यसे यातिमानिनी २ देव्युवाच एकैवाहं जग
त्यत्र द्वितीया का ममापरा पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ३ ततः समस्तास्ता देव्यो ब्रह्माणीप्र
मुखा लयं तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका ४ देव्युवाच अहं विभूत्या बहुभिरिह रूपैर्यदा
स्थिता तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ५ ऋषिरुवाच ततः प्रववृते युद्धं देव्याः शुंभस्य चोभ
योः पश्यतां सर्वदेवानामसुराणां च दारुणम् ६ शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः तयोर्यु
द्धमभूद्भूयः सर्वलोकभयंकरम् ७ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथांबिका बभंज तानि दैत्येंद्रस्त

भेनानामसप्रत्रुपटलयदर्शनेन समस्तोपादानबमस्य एवेति दर्शयति तत्र सत्ताभेदादि सूक्तम् ४ देव्युवाच
अहमिति अहं विभूत्या ऐश्वर्येण बहुभी रूपैर्यद्धस्थिता तद्धुत्वं मया संहृतं तस्मादहमेकैवात्र तिष्ठामि त्वमपि
त्वं स्थिरो भव इत्यर्थः अनेनापि नद्वैतदृढीकृतम् ५ ऋषिरुवाच ततइति पश्यतामिति मनादरे षष्ठी स्पष्टम् १८ २५

हुंवेव तत हुंकारोच्चारणं च तदादिभिः तैर्यथाक्रमसामान्तैः १ ततः सा कुपिता धनुः इषुभिः सह २ छित्त्वेति तथा
तथा तेन प्रकारेण छित्त्वे धनुषि दैत्येन्द्र इत्यन्वयः ३ तत इति शक्तिं क्रुद्धा ततः शक्तिरुद्धः भानुमदिति किरणयुक्तमिम
र्थकं खड्गस्य शतचन्द्रस्य चर्मणो प्रविशेषणं तदा तद्युद्धकाले दैत्यानामधिपेश्वर इति गमकत्वात्समासः ४ चर्मेति

मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी बभञ्ज लीलयैवोग्रहुंकारोच्चारणादिभिः १ ततः शर
शतैर्देवीमाच्छादयत सोऽसुरः सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः २ छित्त्वे धनुषि दैत्येन्द्रस्तथा
शक्तिमथाददे चिच्छेद देवी चक्रेण तामप्यस्य करे स्थितां ३ ततः खड्गमुपादाय शतचन्द्रं च भानुमत
अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः ४ तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका धनुर्मुक्तैः शि
तैर्बाणैश्चर्म चार्ककरामलं ५ हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः जग्राह मुद्गरं घोरमम्बिका
निधनोद्यतः ६ चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वे
गवान् ७ स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः देव्यास्तं चापि सा देवी तलेनोरस्यताडयत ८
तलप्रहाराभिहतो निपपात महीतले स दैत्यराजः सहसा पुनरेव तथोत्थितः ९ उत्पत्य च प्रगृ
ह्योच्चैर्देवीं गगनमास्थितः तत्रापि सा निराधारा युयुधे तेन चण्डिका १० ॥ ॥ ॥

ति चेतनाश्वसारथ्योः समन्वयः ५ तदाह हताश्व इति ६ मुष्टिमिति दैत्याः हृदये इत्यन्वयः तलप्रह
ारणाभिहतः ९५ १६ सहसा तर्कितम् ७ उत्पत्येति भूमेः सकाशात् हर्षेण तां उद्वेगमनादित्यन्वयः
आस्थितः आस्थितवान् निराधारा स्वरथवाहनरथाद्यभावहेतुहीना तेन सह १० ॥

दु.टी. निपुद्दं च यदुग्रं तदहोषणां प्रथमभिनिम्नमानार्थकं निशादेवधेनिविशेषणं मनयोऽन्वयः १९ उमामकंदुकव
ना दुधरिसिद्धायतनसमये वराणां महत् भ्रामयामासेत्यत्र गौनलचिन्तयेमर्थः २० वेगितः वेगवान् २१ २२ वि
३६ हतः कृतव्रणाः चालयन्तिति दूरभावश्चाथ २३ असत्रमकाण्डवत् स्मास्यान्नताविलत्वम् २४ उमाते

निपुद्दं खेनदादेवसंदृष्टिकाचपरस्परं वक्त्रेन अथमंभिद्दनिविस्मयकारकं १९ ततोनिपुद्दं
सुचिरं कृत्वातेनांविकासह उमातथाभ्रामयामासचित्रंयथरणीतले २० सहिमायगणांश्चापम
छिन्नघम्यवेगिनः भ्रमयावत उच्चासाचंडिकानिधनेकृत्वा २१ तमायानततोदेवीसर्वदेवजने
श्वरं जगमायातयामासभिताम्लोनवर्त्मसि २२ सगनाद्यः पपातोर्व्यां स्वीकलाग्रविततः चा
लयन्सकलोष्ठं ग्रीसाब्रिद्वीपांसपर्वतां २३ ततः असत्रमविलहतेतस्मिन्दुर्गमनि जगत्स्वास्थम
नीवापनिर्भरवात्मवत्तभः २४ उत्पातमेघासौलकायमायासलपावंपयुः सहिमोमार्गवाहिन्य
स्तयासलसुपानिते २५ ततोदेवगणाः सर्वे हर्षनिर्भरमानसाः बभूवुर्निहतेतस्मिन्पृथिवी
तलेमेतरः २६ अवादयन्त्येवामेनन्नरप्सरोगणाः बभुः शुभालयावाताः सुप्रभोभू
दिवाकरः २७ जज्वलुश्चाग्नयः शान्ताः शान्तदिग्जनितस्वनाः २८ ॥ ॥ १८

ति उमातत्स्वकामेघाः उत्पातः संभाश्रंभंच उल्कादिव्यतेजः पातसंभवधात तथातद्दस्मरितोमार्ग चि
वाहिन्यः नद्यस्तत्र उत्पथगामिन्यः आसन् तत्प्रभृत्ये २५ २६ अप्सरसाम्नान्तकुलाः २७ जज्वलुरिति अग्नयश्चा चि
हवनीयादयः शान्ताः सौम्याः हेतो जज्वलुः शान्तादिक्तजनिताः स्वनाः उमातत्स्वकाः स्फुटत्वमादि चि ३६

अस्या रूपं यामले यरस्य मह द्रक्षानकाणं चमसलेनथा फलेच कं नघाणं वेद्दं दीवेलांगलेनथा यन्त्रेनानि
द्वानिर्हस्ते देवी विभर्त्ति सा येन पवेन सकाशाघ्नेन वसु विभूषिता नानारत्न समाकीर्णा वेदविद्याविनोदिनी आधारेन व ... स्वरूपाभनिवाहिणीति इति श्रीशिवभद्र सुतसतीगर्भजनागोजीभट्टकृतेसप्तशतीव्याख्याने दशमोऽध्यायः १० ऋषिरुवाच देव्यैति तत्र पुरे वह्निपुरोगमा वह्निमुख्याः कात्यायनी
मित्यनेन परस्यस्यामासमेकामूचयति इष्टस्याभादिवयस्य लभात्वात्मे नु मागमं विकासीनिविकस्वरा

इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये हाथ्य मवधः १० ऋषिरुवाच देव्या हते
तत्र महासुरेन्द्रे सेन्द्राः सुरा वह्निपुरोगमास्तां कात्यायनीं तुष्टुवुरिष्टलाभाद्विकाशिवक्त्राब्ज विकाशिताशाः १ देवि प्रपन्नार्त्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य प्रसीद विश्वेश्वरि पाहि विश्वं त्वमी
श्वरी देवि चराचरस्य २ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि अपां स्वरूप
स्थितया त्वयैतदाप्यायते कृत्स्नमलंघ्यवीर्ये ३ त्वं वैष्णवी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि
माया संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ४ शिवकाशिये येनेनयादृशाणोवि

काशिताः सकाशितानाशा याये १ देवीति प्रपन्नार्भक्तः आर्त्तिहरे प्रसीदेति विशेषः जगच्चराचरस्य निमात्रादेवा

मीश्वरी स्वतया इतरान्सर्वेपरत्वं स्वेनिमिति भाव २ आधारभूतेति तत्र हेतुर्महीरूपेण स्थितिः अपां स्वरूप

तया अवशिष्टस्वरूपेण स्थितया गमकत्वात्समासः आप्यायते पुष्टिमेति कर्मणि लट् यका अनेनापल

ह्यानं साक्षीत्याविवक्षितं १ त्वमिति अपाणादपालनशक्तिमत्त्व द्वितीयकारणशक्तिमत्त्व मायाविद्यात्व

येन त्वमोहितं संसारगर्त्ते पातितं नकिमोतीनाम वमनस्याह त्वं प्रसन्नाकृतमन्ता दीवेप्रसिद्धभविज्ञ

दु॰ टी॰ ना १२ विद्याइति अंगानिवेदाश्चत्वारो मीमांसान्यायविस्तरं पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश आयुर्वेदधनुर्वेदगां-
धर्वार्थशास्त्रैः सहाष्टादशभेदा यस्याः सकलाश्चतुःषष्टिकलारूपेणाः पातिव्रत्यसौंदर्ययुताः स्वरूपाभ्यां पेनाः समस्ताः
स्त्रियः पतिव्रताः स्त्रियः समस्तास्तव पल्लवास्तामिमामाह त्वयैकयेत्यंबया विश्वमिदं पूरितमेतत्त्वमेव वचनस्त्वं स्तुतिः पृथक्त्वस्या
ऽभावात् स्तोतव्यमेव विषये परापरा गौणी मुख्या च वाक्योक्तिस्त्वद्रूपास्तुतिः कातेस्तुतिर्यद्वा उक्तिरूपात्वमेवातःका
तेस्तुतिः ५ बुद्धिस्तवेति गद्ये नाह सर्वेति सर्वभूता विश्वात्मिका देवी द्योतनशीला स्वर्गमुक्त्योः प्रकर्षेण

विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु त्वयैकया पूरितमंबयैतत्का ते स्तुतिः
स्तव्यपरापरोक्तिः ५ सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी त्वं स्तुता स्तुतये का वा भवंतु परमोक्त-
यः ६ सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते स्वर्गापवर्गदे देवि नारायणि नमोस्तु ते ७ कला-
काष्ठादिरूपेण परिणामप्रदायिनि विश्वस्योपरतौ शक्ते नारायणि नमोस्तु ते ८ ॥ ॥

दायिनीति यदा त्वं स्तुता नतदा न वस्तुतये परमा उत्कृष्टा उक्तयः का वा भवेयुर्न काश्चिदपीत्यर्थः ६ तथा भगवत्स्त-
व्याह सर्वस्येति बुद्धिर्निश्चयात्मिका तया न तदा एव च स्वर्गापवर्गदत्वम् नारायणस्य स्त्रियाः शक्तिर्नारायणी
यद्वा नारं जीवसमूहस्तदयनी स्थानं भूतानं रूपात्मकत्वेन बोधनम् तेनत्वम् ७ कलेति कला त्रिंशत्का-
ष्ठा अष्टादशनिमेषः काष्ठा आदिना क्षणमहूर्तादयः परिणामो जन्मान्यवस्थान्तरावस्थाविशेषः तेन
कालरूपात्वम् तदेवप्रदायाह विश्वस्योपरतौ नाशे प्रलये नाशात्मिकेत्यर्थः कालरूपैव जगद्बलकर्ता ८ १२

सर्वमंगलेति मंगलानां मंगलरूपे शिवे कल्याणकर्त्रि शरण्ये शरणार्हे त्र्यंबके त्रिनेत्रे गौरि गौरवर्णे अनेनैव
वीजमस्याधुनिकं तदुक्तं देवीपुराणे सर्वाणि हृदयस्थानि मंगलानि शुभानि च ददाति चेप्सितान् लोके तेन सा
सर्वमंगला भक्तानामार्तिहरणी मंगलानेन सा स्मृता शिवा प्रकीर्तिता [illegible] शिवा सा [illegible] यत
दीक्षितानामस्मात्सर्वलोकस्य कुर्ते अतो देवी समाख्याता लोके सर्वार्थसाधिका [illegible]
[illegible] शरण्या समाख्याता शरण्येन सा देवी मुनिभिः परिकीर्तिता सा त्र्यंबकेन [illegible] त्र्यंबका सा स्म
[illegible] यागाग्निदग्धदेहायाः पुनर्जाता हिमालये [illegible] तेनागौरी न सा स्मृता [illegible]

सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ९ सृष्टिस्थि
तिविनाशानां शक्तिभूते सनातनि गुणाश्रये गुणमये नारायणि नमोऽस्तु ते १० शरणागत
दीनार्तपरित्राणपरायणे सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ११ हंसयुक्तविमानस्थे ब्रह्म
णीरूपधारिणि कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते १२ ॥

[illegible] नारायणी समाख्याता [illegible] शुभं तेषु [illegible]
यतः [illegible] इदं सर्वं जगत् [illegible] महाफल [illegible]
[illegible] ९ सृष्टीति [illegible] सनातनी [illegible] गुणानां [illegible]
[illegible] गुणाश्रये [illegible] गुणमये [illegible] विकारे १० शरणेति दीनाः सर्वैः [illegible] आर्ताः
[illegible] परायणे तत्परे [illegible] हरे इति [illegible] ११ हंसेति हं
सयुक्तविमानस्थिते ब्रह्माणीरूपधारिके कुशाजलं [illegible] कमण्डलुः [illegible] १२

त्रिशूलेति माहेश्वरीस्वरूपेणेतिपूर्ववद्व्याख्येयं ५ मयूरेति मयूरं कुक्कुटं सम्यक् तेनवृते ऋजुः कर्त्तमपि
उ.टी. पुत्रं चवरणायुधं शक्तिमोदिनी मयूरपिञ्छमस्तकी ततः षष्ठेनीपाल्लेवहरणात्मकस्तेनसमाहृते मिद्धवि
ता. शालि: अनन्तश्रीस्वरूपेणेनारायणि तस्वरूपसंस्थानमवयमात्रिवशाश्रयस्य: ६ चक्रेति चक्रादीनिमा
२८ होत्तानियमायुधानियया १५ नृसिंहेति त्रैलोक्यत्राणायसम्यक्कोटिनसमोमसहितेनोयः १६ १ महा

त्रिशूलवरदाभयपरेमहावृषभवाहिनि माहेश्वरीस्वरूपेणनारायणिनमोऽस्तुते १२ मयूरकु
क्कुटवृतेमहाशक्तिधरेनघे कौमारीरूपसंस्थानेनारायणिनमोऽस्तुते १४ शङ्खचक्रगदाशार्ङ्गगृही
तपरमायुधे प्रसीदवैष्णवीरूपेनारायणिनमोऽस्तुते १५ गृहीतोग्रमहाचक्रेदंष्ट्रोद्धृतवसुन्धरे वे
राहरूपिणिशिवेनारायणिनमोऽस्तुते १६ नृसिंहरूपेणोग्रेणहन्तुंदैत्यान्कृतोद्यमे त्रैलोक्यत्रा
णसहितेनारायणिनमोऽस्तुते १७ किरीटिनिमहावज्रेसहस्रनयनोज्ज्वले वृत्रप्राणहरेचै
न्द्रिनारायणिनमोऽस्तुते १८ शिवदूतीस्वरूपेणहतदैत्यमहाबले घोररूपेमहारावेनारायणि
नमोऽस्तुते १९ दंष्ट्राकरालवदनेशिरोमालाविभूषणे चामुण्डेमुण्डमथनेनारायणिनमोऽस्तुते २०
लक्ष्मिलज्जेमहाविद्येश्रद्धेपुष्टिस्वधेध्रुवे महारात्रिमहाविद्येनारायणिनमोऽस्तुते २१ मेधेस
रस्वतिवरेभूतिबाभ्रवितामसि नियतेत्वंप्रसीदेशेनारायणिनमोऽस्तुते २२ २२ २२ ॥
बन्धहरेति महद्भयंयस्याः १९ शिवेति इन्द्रदैत्यानांमहाबलंयया सा ११ २० देवेति महालक्ष्मीविद्याउपनिष
त् ग्रहाग्रलिमावृद्धिः पुष्टिसहितमथ महतीशिवप्रसंवावरणासमर्थामहामोहलक्षणा ११ मेधेति
मेधाधारणावतीवृद्धिः सरस्वतीवाग्रूपा वरेश्रेष्ठे भूतिः सततन्मयाने ह्राटसारणाभावः अनेनसमि
कीत बभ्रुवर्णारगणालयुक्तेनामसिनमोऽस्तुते ह्रूरमूलप्रकृतिभेयप्रदाभिप्रायेणानियमिरक्षणे रूपे २२

सर्वैति देवीमर्धाहिस्तोकि: ममाद्नेमाहीमार्धं २२ सर्वभूतेभ्य: सर्वभूतविकारेभ्य आभिाभ्यश्च कामार्थिनत।
लक्ष्यधसेभवे २४ ज्वालेति नो: स्याभीतेर्भयात् २५ हिनस्तीति श्रत: मीतीमातावास्वतानिवनो: स्मासायेभ्यःपा
निमर्षः अनितेयवाघ्रव २६ असरीति रर्चितोलिम: करहस्तउज्वलर्धानिकरै: किरणोरुज्वलोवा २७ रोगानिति
अभीष्टानियान अपहसीम तृष्यते विपन्नहष्टवियोगलस्तणा थत स्वामाश्रिताग्रमेवामाश्रमायतामया

स्व सर्वेस्वरूपेसर्वेशसर्वशक्तिसमन्विते भयेभ्यस्त्राहिनोदेविदुर्गेदेविनमोस्तुते २२ एतत्तेवदनंसौम्य
लोचनत्रयभूषितं पातुन: सर्वभूतेभ्य: कात्यायनिनमोस्तुते २४ ज्वालाकरालमत्युग्रमशेषा
सुरसोदनं त्रिशूलंपातुनोभीतेर्भद्रकालिनमोस्तुते २५ हिनस्तिदैत्यतेजांसिस्वनेनापूर्ययाजग
त् साघण्टापातुनोदेविपापेभ्योन: सुतानिव २६ असुरासृग्वसापंकचर्चितस्तेकरोज्वल: शुभा
यखड्गोभवतुचण्डिकेत्वांनतावयं २७ रोगानशेषानपहंसितुष्टारुष्टातुकामान्सकलानभीष्टा
न् त्वामाश्रितानांनविपन्नराणांत्वामाश्रिताह्याश्रयतांप्रयान्ति २८ एतत्कृतंयत्कदनंत्वयाद्य
धर्मद्विषांदेविमहासुराणां रूपैरनेकैर्बहुधात्ममूर्तिंकृत्वांबिकेतत्प्रकरोतिकान्या २९ विद्यासुशा
स्त्रेषुविवेकदीपेष्वाद्येषुवाक्येषुचकात्वदन्या ममत्वगर्तेतिमहान्धकारेविभ्रामयत्येतदतीवविश्वं

ति २८ एतदिति कदनंनाश: धर्मद्विषो: सुरा: अद्य अधुना आत्ममूर्तिमेव अनेकरूपै: मत्स्यादिकल्पादि
लक्षणै: अंबिकेतत्तीया बहुधा बहुप्रकारा: असमानहितसम्भावनकोपितात्मक: २९ विद्यासिति विद्यासुशास्त्रेषु
उपायभूतानिशास्त्राणिवेदादीनि तेषुमध्ये [illegible] विवेकदीपेषु तुष्यति यस्त्वया वाक्येषु चकोपकारेषु
वेदवाक्येषु मत्वे च ममत्वगर्तेतदाश्रयेमहान्धकारे संसारेरूपनदीह [illegible] तदन्याकात्वतीवविभ्रामयतितकापी

दु॰टी॰ रक्तांशेति नागाः सर्पाः प्रभयं चेमनुष्याणां दस्यवः चौराः रावोचनं तया क्लिमध्ये यच्चेदोषाः प्राट्यः तच्चमे वत्सापयं त्वावि नाविश्वपरिपासीति सर्व॥ ३३ यत्त्वं विश्वेश्वरी तो विश्वं परिपासि यत्त्वं च विश्वात्मिका ॥ना॰
स्वतद्धारयसि यतो भवती विश्वेशानां ब्रह्मादीनामपि वन्द्या तस्यां भक्तिनम्रा ये ते विश्वाश्रया भवन्ति
३९ ३२ देवीति देवि विनोऽरिभीतेः त्वत्प्रसादो भीतेः पालय यथाधुनैव सम्प्रसेवामुरवधान्नः पालितं

रक्ताम्भिये योग्विषाम्बनागाय चोरयो दस्युवक्त्रानियत्र देवानलोयत्र तयाक्लिमध्ये तत्रास्थितानं
परिपासि विश्वं ३३ विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वं विश्वेशवन्द्या भवती
भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः ३२ देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधु
नैव सद्यः पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ३३ प्रणतानां प्र
सीद त्वं देवि विश्वार्तिहारिणि त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ३४ देव्युवाच वरदा
हं सुरगणा वरं यन्मनसेच्छथ तं वृणुध्वं प्रयच्छामि जगतामुपकारकं ३५ देवा ऊचुः सर्वाबाधा
प्रशमनं त्रैलोक्यस्याखिलेश्वरि एवमेव त्वया कार्यमस्मद्वैरिविनाशनं ३६ देव्युवाच वैवस्वते
न्तरे प्राप्ते अष्टाविंशतिमे युगे शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ३७ ॥ ॥

नवतस्मित्तथेत्यर्थः सर्वजगतां पापानि प्रशमं नयाशु चञ्चत्पामुत्पातपाकजनितांश्च उत्पातानां पाकः फलदानकालस्तेन जनि
तान्महोपसर्गान्महामारीप्रमुखान्प्रशमं नय ३३ प्रणतानामिति स्पष्टोऽयं श्लोकः ३४ देव्युवाच वरदेति यद्वरं यन्मनसीच्छ
थ तं वृणुध्वं याच्यध्वं ३५ देवा ऊचुः सर्वाबाधेति सर्वा बाधास्तासां प्रशमनं त्वद्वैरिविनाशनं चास्मत्प्रियार्थं एव
मेव प्रभाविद्धिनाशनं कर्तव्यं ३६ देव्युवाच वैवस्वतन्त्वे इति मन्वन्तरे प्राप्ते अष्टाविंशति तमे अष्टाविंशतिसंख्यो ३५
के॰ २ टी॰ महायुगमष्टादशः युगं चतुर्युगं तत्र कलियुगं परस्मा पावन योरुत्पत्तिः ३७

नंदेति नंदगोपगृहे यशोदायां महालक्ष्म्यंशभूता नंदा भगवती नाम या भविष्यति नंदजा कनकोत्तमकांतिः
सा सुकांतिकनकांबरा कमलाकृतपाणाब्जसंकृतचतुर्भुजा इंदिरा कमला लक्ष्मीः सा श्रीरुक्माबुजासन
नेति रहस्योक्तेः अस्याः वीर्याद्रेनवरात्रे प्रादुर्भावः ३८ पुनरपीति इयमपि हायपरेतीनेतत्रेवचतुर्युगे वती
र्णा साह वैप्रचित्तान् विप्रचित्तिवंशजान् ३९ ४० ततइति दंष्ट्राः रक्तदंतिकाः कालरात्रिभूता रक्तदंतेसुपल
तया कैवास्तु श्रावोत्पत्तेर्यथैव भुरक्तमस्याः अतएवास्याः रक्तचामुंडा मेनकावहयाः तथा उत्तमवर्णाऽभा

नंदगोपगृहे जाता यशोदागर्भसंभवा ततस्तौ नाशयिष्यामि विंध्याचलनिवासिनी ३८
पुनरप्यतिरौद्रेण रूपेण पृथिवीतले अवतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान् ३९ भक्षयं
त्याश्च तानुग्रान्वैप्रचित्तान्महासुरान् रक्तदंता भविष्यंति दाडिमीकुसुमोपमाः ४० ततो मां देवताः
स्वर्गे मर्त्यलोके च मानवाः स्तुवंतो व्याहरिष्यंति सततं रक्तदंतिकाम् ४१ भूयश्च शतवार्षिक्या
मनावृष्ट्यामनंभसि मुनिभिः संस्तुता भूमौ संभविष्याम्ययोनिजा ४२

रक्तांबरविभूषणा रक्तपुष्पा रक्तनेत्रा रक्तकेशा चितमूर्धजा रक्तदंती रक्तरत्नालंकारदंष्ट्रातिभीषणा वसुधे
व विस्तीर्णा सामेरुयुगलस्तनी स्तनौ लंबावति स्थूलौ कर्कशावतिमांसलौ सर्वकामफलप्रदेवाभक्त
मालिंगयति दृष्टि सर्वदुःखयानयात्रसुसकललोकलंकरैः विभूतीनियामलोकेः अत्रसर्वत्राहमितिनिर्देशः
परस्परमपि शाकीनामभेदाभिप्रायेण ४१ भूयश्चेति अनंभसि कूपादिजलशून्यायामपीमर्थः अयोनि
जायत इदानीं पार्वतीदेहादाविर्भाव एवमेवमर्थः ४२ दुर्गायै नमः ॥ नमो भगवते वासुदेवाय

यदास्मान्मुनीन्नेत्रैरीक्षिष्यामि ततस्तस्मात् ४५ देवस्तुतमतं तेरेणचवनारिंशत्तमेयुगे शताक्षीशाकंभर्यवता
रः नमिन्नेवान्तरे वाचत्वारिंशत्तमेयुगे रविलक्ष्मीतयोक्तेः तत्रैव दुर्गानामासुरवधः शाकंभरीलब्धमाय
शाकंसंख्यकत्वमेव अथयामस्मृते भक्तिमंत्रपानोऽस्वात्रिमूर्तिचतुष्टयेव नूलवर्णमहातनगनीलासल
विलोचना गंभीरनाभिस्त्रिवलीतनुमध्यामनोहरा सुकर्कशा चक्रमासाद्यनपीनघनोन्नतस्तनी भुजा
विशालास्त्रीवाणमंत्रपत्रलया पुष्पपल्लवमूलादिफलशाकसमन्वयान् मारिमानानीवितार्थाय

ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् कीर्तयिष्यंति मनुजाः शताक्षीमिति मां ततः ४५
ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ४६
शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरं ४७
दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ४८
रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् तदा मां मुनयः सर्वे स्तोष्यंत्यानम्रमूर्तयः ४९

बिभर्तीति यामले ४४ शाकंभरीति यथा पार्वतं प्रोक्तं शाकंभरी शताक्षी सा दुर्गा सैव प्रकीर्तिता उमा
गौरी सती चंडीकालिकेयं च पार्वती शाकंभरी नीलवर्णा माया युक्तैः दुर्गा नामासुरः तत्रैव शाकंभर्य
वतार एव पत्रमूलकंदरीरादिफलकादीनि ऋतुकाः सकलशाकवन्मंचेति शाकं दशविधं स्मृतं अथ दुर्गा
मोहरण्डः पुरुवाचनेऽर्धतिथितिव्रत्नाणो लव्धवरः अस्य वधकाल रात्रिर्हेती विवाधं तु हृदये
भवान्यास्ति पुरवित्रपुरं सुंदरीकामाख्याजभैरवी नीलसरस्वती प्रभृतिरूपकाह्वित्रमस्या मानगपा

भीमेति भीमापि नीलवर्णा दंष्ट्रादशनभासुरा चंद्रहासं च डमरुं शिरः पात्रं च बिभ्रती एकवीरा कालरात्रिर्गीर्ने
ध्यानस्मातुरन्येषुसके इयं कालरात्रिरेव पंचाशत्तमे चतुर्युगे वैवस्वतमन्वंतरे एव भीमावतार इति लक्ष्मीतंत्रे
इयं चैव त्रयार्थिना हृन्या आरुणाख्योऽसुरो नाम ४८ तदेति भ्रामरं पारिशयनमरं असंख्येयाः षट्पदा यस्मिन् तत्
येन तत् ४९ भ्रामरीति तेजोमंडलदुर्धर्षा भ्रामरी चित्रकांतिभृत् चित्रभ्रमरपाणिः सा महामारीति गीयते म
हामाया महाकाली महामोहा तथा नंदा दुर्गमेत्यर्थमपि कालरात्रि सर्वतः सर्वत्र वैवस्वतेनंतर एव बोध्यं

भीमादेवीति विख्यातं तन्मे नाम भविष्यति यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ४८ तदाहं भ्रा
मरं रूपं कृत्वासंख्येयषट्पदं त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरं ४९ भ्रामरीति च मां लोकास्त
दा स्तोष्यंति सर्वतः इत्थं यदा यदा बाधा दानवोत्था भविष्यति ५० तदा तदावतीर्याहं करिष्याम्यरिसंक्ष
यं ५१ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये नारायणीस्तुतिः ११ देव्युवाच एभिः स्त
वैश्च मां नित्यं स्तोष्यते यः समाहितः तस्याहं सकलां बाधां शमयिष्याम्यसंशयं १ मधुकैटभनाशं
च महिषासुरघातनं कीर्तयिष्यंति ये तद्वद्वधं शुंभनिशुंभयोः २ अष्टम्यां च चतुर्दश्यां नवम्यां चैक
चेतसः श्रोष्यंति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ३ न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः भ
विष्यंति न दारिद्र्यं न चैवेष्टवियोजनम् ४

तमे चतुर्युगे भ्रामर्यवतार इति लक्ष्मीतंत्रे इत्थमित्याद्युत्तरार्धं स्पष्टं ५० ५१ इति श्रीशिवभट्टसुतसतीगर्भजना
गोजीभट्टकृते सप्तशतीव्याख्याने एकादशोऽध्यायः ११ देव्युवाच एभिरिति मधुकैटभवधादिलक्षणोविम
र्थः सकलामैहिकीं पारलौकिकीं च समाहितोऽनन्यमनाः १ २ श्रोष्यंति च वा सपठिष्यंति अष्टम्यामित्यादि
सप्तम्येकालकथनं ३ नेति दुष्कृतेपानये दरिद्रस्यास्तव्यजिनिति दारिद्र्यम् ४

दु॰टी॰ ना॰ ४१ माशुभंदेति नपादेनिसंत्रासभित्तविषयं ५ तस्मादिति सदानितं श्रियतः तन्माहात्म्यं स्वस्तिकल्याणं तस्या-
यनमार्गः ६ उपेति माहात्म्यकृतमहामारीभ्यामयं प्राप्तलाभरोगजन्यतदुपकरी देवता ततः समुद्भवाद्वाधेषां
तान् उपसर्गान् उपद्रवान् तथा त्रिविधं आधिकारागादेहादिद्रूय आध्यात्मिकं भूतभूतामेनादिजन्यमभ्यु-
मादि आधिभौतिकं वैरहृत वज्रपातदावाग्न्याद्याधिदैविकं तद्रूपमुत्पातमितिहेतु विरमममात गृहेवदेति भो

पाप्नोति न भयं तस्य दस्युतो वा न राजतः। न शस्त्रानलतोयौघात्कदाचित्संभविष्यति ५ तस्मान्ममै-
तन्माहात्म्यं पठितव्यं समाहितैः। श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ६ उपसर्गानशेषांस्तु
महामारीसमुद्भवान्। तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ७ यत्रैतत्पठ्यते सम्यङ्नित्यमाय-
तने मम। सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ८ बलिप्रदाने पूजायामग्निकार्ये महोत्सवे।
सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ९ जानताजानता वापि बलिपूजां तथा कृताम्। प्रतीच्छि-
ष्याम्यहं प्रीत्या वह्निहोमं तथा कृतम् १०

त्रिविधमुत्पातं च ७ यत्रेति यत्र यतने गृहे मयत्संबंधेतत्सम्यक् अर्थावधारणपूर्वकं प्रमवृत्तिनवर्णो
दिवा ८ बलीति बलिप्रदाने देवतोद्देशेन पश्वाद्युपहारः पूजा गंधादिनार्चनं अग्निकार्ये देवीदेव-
तोद्देशो होमः महोत्सवः पुत्रजन्मविवाहादि उच्चार्यमिति निमित्तविषयं ९ फलमाह जानतेति जानता वि-
धिज्ञेन अजानता तादृशेन बलिपूजा हवनं तथाविधप्रकारेण तन्माहात्म्योद्धारणादेशमति यत्नाक
किंचिदपि कृतं तेन प्रतीच्छिष्यामि स्वीकरिष्यामीत्यर्थः च वर्गमध्यः पाठप्रमाणो वाकुलकोके प्रतीच्छया [illegible] ४१

शारदिति शरत्काले आश्विनशुक्लप्रतिपदमारभ्य क्रियमाणा दुर्गार्चनरूपा या च वार्षिकी वर्षप्राप्तो वर्षादौ चा
द्विकः तेन चैत्रशुक्लप्रतिपदमारभ्य क्रियमाणा चेत्यर्थः श्रुत्वेति पठनस्याप्युपलक्षणं ११ तदनन्तरोपि ॥ सर्वा
बाधो बाधा चेत्यर्थः १२ उत्पत्तयः प्रादुर्भावान् द्वितीयार्थे प्रथमा पराक्रमं च सिद्धौ वा युद्धेषु सत्सु
१३ उपपद्यते प्राप्यते कुलं च नन्दते वर्धते १४ शान्तिकर्मेत्युपसर्गादिनिवर्तके कर्मणि तस्मिन् तत्स्थाने इत्यर्थः ग्र
हपीडासु विषयार्थे १५ तदेव विवृणोति उपसर्गा इति दुःस्वप्नस्य फलाभावो न तु नलेन सुस्वप्नकार्यापि १६ बाल

शरत्काले महापूजा क्रियते या च वार्षिकी तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ११ सर्वबाधा
विनिर्मुक्तो धनधान्यसुतान्वितः मनुष्यो मत्प्रसादेन भविष्यति न संशयः १२ श्रुत्वा ममैतन्मा
हात्म्यं तथा चोत्पत्तयः शुभाः पराक्रमं च युद्धेषु जायते निर्भयः पुमान् १३ रिपवः संक्षयं यान्ति कल्या
णं चोपपद्यते नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वतां १४ शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नद॑र्श
ने ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम १५ उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः दुःस्वप्
नं च नृभिर्दृष्टं सुस्वप्नमुपजायते १६ बालग्रहाभिभूतानां बालानां शान्तिकारकं संघातभेदे च नृ
णां मैत्रीकरणमुत्तमं १७ दुर्वृत्तानामशेषाणां बलहानिकरं परं रक्षोभूतपिशाचानां पठ
नादेव नाशनम् १८ सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् पशुपुष्पार्घ्यधूपैश्च गन्धदीपै
स्तथोत्तमैः १९ विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशं अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्स

ग्रहाः पूतनाद्याः संघातभेदे मैत्रीविघटने १७ दुर्वृत्तानां दुष्टानां कार्यसूचकादीनां १८ पशुमांसादिश्लोक
द्वयमेकान्वयि पशुर्बलिः च ग्रो ... अर्घः तीरं दुग्धाग्राणि दध्यक्षततिलमिलितानि च यवाः सिद्धार्थकाः
पश्च द्रव्योऽर्घः प्रकीर्तितः १९ विप्राणामिति प्रोक्षणीयैः पंचामृताभिषेकादिभिः अन्यैर्विविधैर्भोगैः
नगादयः प्रदानैः मधुरद्रव्यैर्न विप्रेभ्यो दीयमानैर्भासो लेकारादिभिः प्रतेरनिशं क्रियमाणायां वत्सरा

सामिप्यं त्वच्चरिते तव कृते इत्यर्थः अश्रावणतामपनस्तासां पठतस्यापि अन्वयो अधिकपल्लवमित्ति कथितं अत्रान्तिमा
यजनान्वयि २१ ममजन्मनाकीर्तनश्रुतमर्थः बुद्धेश्वितितस्तान्वयि २२ तस्मिन्निति पुष्पाभिः स्वनयो
ना· याभ्रमनेनरायत्ताभ्रतं नमाद्यिर्गादिकं वस्तु कृतं तथान्तमाग्र्यर्षिभिः सह यावत्पुष्पाभिः कृताम
टी· द्विधानकरीलक्तपाइत्यर्थः यथानन्तनोजरबीणामपिकर्तनं तथामभोवतितृप्तिं कृताद्दिलचदे
ना· ष्ठाइत्यर्थक स्तमीतवैकवाकानादिमवयेयं एवचेतानिसर्वेषिणोयात्मनकृतकोमनादीनीनिवोध्य २१
५२

प्रीतिर्मे क्रियते साम्प्रतं त्वच्चरितेषु ते अलं ह्वतिपथानितघारोगं भयच्छति २१ रत्नाक
रोनिभूते भोजन्मनाकीर्तनेमम बुद्धेशुचरितेयस्मे तुष्टे मभिवर्द्धताम् २२ तस्मिन्कृते विचि
ते मर्त्य भस्मानजायते पुष्पाभिः स्वनयो याभ्रया भ्रम्रसर्षिभिः कृता २३ अन्यत्रचक्रे नाला
त्मयमकृतिम्भोमति अरण्ये प्रान्तरे अपिदावाग्निपरिवारितः २४ दस्युभिर्वा वृतः स्वग्र
हीनो वापि शत्रुभिः सिंहव्याघ्रबयानो वा वने वा वनहस्तिभिः २५ राजाग्रे हन्तरुद्धो वधो
वधनोपि वा आकृष्टो वा यातनास्थितः पातालमहार्णवे २६

अरण्ये प्रान्तरे दावाग्निपरिवारितः अरभ्योमनाभ्युदयसाधनी यथाकृतिरस्ति अरण्ये इत्यादि
श्लोकचतुष्टयेकान्वयि प्रान्तरे दूरशून्यमार्गे अरण्ये इत्यस्य दावाग्निमादिनान्वयः प्रान्तरे इत्यस्य दस्युभि
रित्यादिनान्वयः केवलेप्रान्तरे वा दस्युभिर्वा वृतो वा २४ दस्युभिरिति श्लोकनिर्जने देशमनुत्तान्वयि
वनहस्तिभिरित्यस्य वनेवेतिपाठः २५ राजेति अदेनराजाग्रेचवधस्थानमाहमतुमनन्वयः सर्वत्रवा अन्न
मुचे महार्णवेपातालस्थितो वा तेनाकृष्टितनश्राकृष्टितश्च ५२

पतत्स्वचेति सर्वाबाधासु महापीडासु वेदनानुखेनाभ्यर्दितः पीडितः ॥ २७ ॥ स्मरन्निति मच्चरितं निकमेकं तेरितं संकटं दुःखं ३ नराः पिमत्तरान्तपि ॥ २८ ॥ दूरादेवेति मम चरितं स्मरतः मम प्रभावात् सिंहाद्याः सिंहव्याघ्र उतरा दयः दस्यवश्चौरा वैरिणः शत्रवः ॥ २९ ॥ पश्यतामिति अनादरे षष्ठी निराकृत्य निरादृत्य ॥ ३० ॥ इमाः शब्दम् आययुः प्राविशन् ॥ ३२ ॥ उपसंहरति एवमिति सम्भूय स्वरूपं शरीरमाश्रित्य भूपेति नृपेति निकमेकं तेरितं ॥ ३३ ॥

ऋषिरुवाच

पतत्स्वचापि शस्त्रेषु संग्रामे भृशदारुणे सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥ २७ ॥ स्मरन्ममैतच्च
रितं नरो मुच्येत संकटात् मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा ॥ २८ ॥ दूरादेव पलायन्ते स्मरतश्च
रितं मम इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ॥ २९ ॥ पश्यतामेव देवानां तत्रैवान्तरधी
यत तेऽपि देवा निरातङ्काः स्वाधिकारान्यथा पुरा ॥ ३० ॥ यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः दैत्याश्च
देव्या निहते शुम्भे देवरिपौ युधि ॥ ३१ ॥ जगद्विध्वंसिनि तस्मिन्महोग्रेऽतुलविक्रमे निशुम्भे च महावीर्ये शे
षाः पातालमाययुः ॥ ३२ ॥ एवं भगवती देवी सा नित्यापि पुनः पुनः सम्भूय कुरुते भूप जगतः परिपाल
नम् ॥ ३३ ॥ तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥ ३४ ॥ व्याप्तं त
यैतत्सकलं ब्रह्माण्डं मनुजेश्वर महाकाल्या महाकाले महामारीस्वरूपया ॥ ३५ ॥ सैव काले महामारी

इत्थं मोहकत्वात् गुणमयं संहरति नयति सृजनेन नयति प्रायाचितना फलमन्नादि प्रपरु नभक्ति विज्ञानं आत्मानन्दम् नयच्छति फलादिदानक्रियया ... ऋद्धिं प्रयच्छति संहितायामविवक्षितत्वात्संधिः ॥ ३४ ॥ व्याप्तमिति महतामात्मादीनां विकलयति अधिकाररूपतां नयति सा महाकाली तया महाकाले प्रलये महामारीसंहारक्रियातद्रूपया तयैतद्व्याप्तमित्यन्वयः ॥ ३५ ॥ सैवेति काले प्रलये महामारी संहारशक्तिः सृष्टिः सर्गोपक्रिः अजा जन्मरहिता काले स्थितिकाले सनातनी नाशरहिता ॥ ३६ ॥

भवकाले संपत्समये वृद्धिप्रदेति लक्ष्मीर्विशेषणं अभावे विपत्काले ४० पुष्पैः पुष्पधूपदीपाद्यैः संपूजितेत्य
दु॰ टी॰ र्थः ४१ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये गुप्तवत्यां फलस्तुतिर्नाम द्वादशोऽध्यायः १२ ऋषिरुवा
मा॰ च एतदिति एवमुक्तप्रकारेण धार्यतइति सृष्टिप्रलययोरुपलक्षणम् हे भूपेति सुरथसंबोधनं १ विद्यात
४२ ज्ञानं तथैवेति समुच्चये तयात्वमित्यस्यार्थः एषवैश्यः समाधिः उत्तमाधमतरान्यपि तथैवान्ये अमेवे

भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे सैवाभावे तथालक्ष्मीर्विनाशायोपजायते ४० स्तुता संपू
जिता पुष्पैर्धूपगन्धादिभिस्तथा ददाति वित्तं पुत्रांश्च मतिं धर्मे तथा शुभां ४१ इति श्रीमार्कण्डेयपुरा
णे सावर्णिके मन्वन्तरे देवीमाहात्म्ये फलस्तुतिः १२ ऋषिरुवाच एतत्ते कथितं भूप देवीमाहात्म्यमुत्त
मं एवंप्रभावा सा देवी ययेदं धार्यते जगत् १ विद्या तथैव क्रियते भगवद्विष्णुमायया तया त्वमेष वैश्य
श्च तथैवान्ये विवेकिनः २ मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे तामुपैहि महाराज शरणं
परमेश्वरीम् ३ आराधिता सैव नृणां भोगस्वर्गापवर्गदा मार्कण्डेय उवाच इति तस्य वचः श्रुत्वा सुर
थः स नराधिपः ४ प्रणिपत्य महाभागं तमृषिं संशितव्रतम् निर्विण्णोऽतिममत्वेन राज्यापहरणे
न च ५ जगाम सद्यस्तपसे स च वैश्यो महामुने संदर्शनार्थमम्बाया नदीपुलिनसंस्थितः ६ ॥

न्यर्थः विवेकिनः अपि गतलोकव्यामूढतया २ मोह्यन्तइति मोहो मिथ्याज्ञानम् उपेहीति शरणं व्रज इत्यर्थः
३ आराधितेति सैव प्रसन्ना सती सर्वं फलदायी एवं वेति सूचितम् भोगः ऐहिकः मार्कण्डेय उवाच इतीति
स्पष्टम् प्रणिपत्येति संशितव्रतं तीक्ष्णव्रतम् निर्विण्णोऽतुः व्याकुलः ममत्वेन ममतायाः प्रवाहः ५ जगा
मेति नद्यास्तीरे यस्य स अयमर्थः एवमग्रेऽपि ६

मयेति देवीसूक्तं ऊर्ध्वदृष्टिसिद्धमहंविशेषाभिमानादीयके श्रीसूक्तमाथर्वणपरिसिद्धमित्यन्ये वस्तुतो देवीसूक्तं
नमो देव्या इत्यादिकं पंचमाध्यायस्थस्तुतिरूपं तत्सर्वं देवताकृतस्याध्यायमहात्म्यस्य स्तोत्रं शुभादिवर्णाभिमे
मादिभिर्देवैरेव सर्वैकरूपविहायैवपूर्वोक्तफलकं तत्काम्याभ्यां नाभ्यां तत्र सत्र परस्मिन्नवाद्युद्धिसंविहितम
वेदमेवदेवीसूक्तपदेनगृहीतमस्थितं तत्मीतेऽवसंमतव्यापमर्थं इतिप्रयोगेवनिरूपितमिमपदं प्रायाय: स
म्यितं वीरतेषामवीजं ह्रतावाने त्रिकेपाविद्युत्वाद्यायप्रणावादिनमीतकम अवकाशिद्धिदेवेपदेवी सूक्तं
परस्मात्मनिविशिष्टमिति - सूद्दामाइसा श्रुचितपंमांद्धोमः पुष्पधूपेर्गंधदीपाद्यपलसिकेः आद्येपना

सचैवषष्ठपेलपदेवीसूक्तंपवंजपन तोतसिमत्स्तुतिनेदेव्या: कृत्वात्संतिमदीमर्पी - सद्देतो
वकत्तसमा: पुष्पधूपाग्रितर्पणै: निराहारोपलाहारोतन्मनस्कासमाहिता - ददतीवोलि
चैवनिजगात्रास्नुगाहितं एवंसमाराधयतो: त्रिभिर्वर्षैयतात्मनो: २ ॥

हारोपुत्स्याहारोतनतोनिराहारोस्मकाहारौ सनेनदृष्टपरा: स्तुविता: तन्मनस्कोदेवीमनस्कोसमाहितोमल्कबा
धचेष्टा - ददतीति सैवलिंचपत्नकृष्णाशाधृपदावेददन: एवसमवगात्मादे: तासैवनिजरुधिरसिक्तं प
मेनवैषपमनत्वसानेकृनयामानिकेभेनकंपतजसष्टनार्धप्रहतिनिरमपवातम तजसषुद्धाधिकारत्वेननत
लपमानिकफलेवाधकाभावात् काम्यप्रणामसहितकमलहृयायाजसफलवत एवंचकार:सष्टार्थ: यतान्स
कोर्जितविनयो: नन्ववतिपवैसपोत्तेवर्णिकत्वेनात्विद्धिक्रुमवगावहृधिरोहितवलिदानेकपमधिकार: नद
कंपराधारेणवगाण मलवेदीसहीर्ष:संगाह्य:सर्वेवनम: अत्रमलकृतेनर्षभ्रमर्वानिमनिमततमा: स्तन

यच्च पुराणानि भारतप्रभृतान्यपि कश्चित्करोति नेवार्थकरासेतानुनीश्वरः श्रुतिकाहिविशेषणानोपवर्द्धन
३ री वैमालिके ब्राह्मणाः तत्रिवेणोमोवानिःशेकेनमोविमेनेन वर्णाश्रमपरिभ्रष्टः शाघाविशेषुनन्मुवः वेदेन
नानामनामापपीनद्रुमेमाचेरेन वेदवादेनरासमकावदकोमरकेगतानीति मतसंहितायामपि नथापिपोशे
४८ मार्गाणां वेदेनन विरुध्यते मोशः प्रमाणामिलुकेके धार्मिविरुद्धिकारिणाम अथेतमल्लिनानातुधामिनो
वेदमार्गतः मार्वविभक्तिकस्तमिः वेदमार्गेणालयेः टीकानामिनिवेशः पांचरात्रादयोमार्गाः कालेनेवा
पकारिकारति केमैपि ब्राह्मणानां गौतमशापेन चपीवा घवेनाते नेःस्तनोशिवकेशवाविलपक्रम च
कारमोदृशास्त्राणिकेशवःसशिवस्तदा कापालेनाकुलवामंभैरवंपूर्वपश्चिमं पांचरात्रपाशुपतंतथान्या
निसहस्रशः कश्चिद्विनपुराणादौ वेदमूलेपिसर्वथा मेतिनिर्मूलनेत्राणांस्तनग्राह्यानवैदिकमिति मो
दृशास्त्रवैदिकफलदत्वेनेननतत्त्वेचोक्तपारलौकिकफलेष्वपि विसंवादविघ्नपामिनत्वादितनदर्थबोध
कुर्वविषयस्ववैदिकमार्गत्यागजमोदृजनकत्वातेत्राणांनिर्मूलत्वंच वेदामूलकत्वात पाधपार्वतीय
संवादे शापोर्ढविप्रवत्सामिनामसानिधयाकम नेषां ब्रह्मणामात्रेणापानिमेत्तानिनामुपि शुण्मदि
मयैवाक्रमशेवपाशुपतादिकं मच्छक्त्यावेशितैर्विप्रैःसंप्रोक्तानिततःपरं कणादेनतुसंप्रोक्तंशास्त्रंवैशे
षिकंमहत् गौतमेनतथान्यायंसांख्यंतुकपिलेनवै द्विजन्मनाजैमिनिनापूर्ववेदप्रकाशकं निरीश्वरेणवाद
नकृतंशास्त्रमहत्तरं धिषणेनतथाप्रोक्तंचार्वाकमतिगर्हितं दैत्यानांनाशनार्थायविष्णुनाबुद्धरूपिणा वे
दार्थवन्महाशास्त्रंमायावादमवैदिकं मयैवकल्पितंदेविजगतांनाशकारणात् इति न्यायवैशेषिकयोस्त्व
त्वदुःखादिमत्त्वमात्मनःश्रुतिविरुद्धं निरीश्वरतासांख्यमीमांसकयोःश्रुतिविरुद्धेति तदंशेनप्रामाण्य
लंपमायावादोनास्तिकानां बौद्धलोके वेदमार्गपरित्यागेनत्रमार्गाणांवललकंपादिल्यपतिविस्तवः

भिभिकल्पनित्युत्तेर्दुसादसीतमनोऽस्याम् कोऽसावर्थांगमावार्थेऽत्रोक्तेत्वयाविना शाक्तःपापबलात्
नकर्तृत्वेनपिकल्प्यते कस्मै कुमार्गेणापिवर्तीत्युक्तम्नायज्ञानमत्वधा श्रुतः कालेनमहतावेदमार्गगामि
धर्मीति श्रुत्वपापबलात्कलिरितिकाएवंजन्मपापमकलमारोनेत्रप्रवेशोवकाशादिमितिनिहितम् स्वरूपे
वभवाधिकारिकल्पत्वंचतेषांनविहितम् मन्त्रेवस्थलेनानवे पांचरात्रेभगवतैवोर्धदेशगतेत्वैषा लोकापवनेवक्ता
पालेमांसंधस्पृष्टंनतथा नाकलेभवेद्वक्ताम यात्केशांभवपापमले एवंविधाविशास्त्राणि विरुद्धानि मदानुरे
वतःप्रमाणभूतेनवेदेनमुनिसूत्रम् वैदिकानित्यानित्यमानसामपिवसंमेवेत इति सर्ववेदाविरोधेनप्र
माणानामप्रामाण्यवेत तस्मात्सर्वेषांप्रत्यक्षेणवेदत्वेदविहितेवत्र सकलवेदविरुद्धानिवेदमेकसमाचिन्यतिन्त्र
सर्वेस्मिन्निश्चयाद्दोषनापिकृतपर्मार्थिकं जातं स्वागमकल्पितेस्तत्वतनात्महित्सुपाख्यत्कुरु सांचगोप
पचेनत्पात्स्त्वहितेषां नैनवेति वारह श्रुभावेदसंज्ञाणपांचरात्रादितोविधिरिति सात्वतपुराणे स्मृति
भवः प्रतिपाकत्याचचिन्नेभगवतः क्रमशाक्लितिश्रुतिकथा प्रमाणत्वमाविशेत पंचरात्रभागवतंतेत्र
वेदानसाधिपं वेदमहात्मवदिस्पकमलापतिकृतवानिति इतिचेन्न शैलादेनंतविधाप्राणिविशेष
एभवेन्न्यथ शैलागमाचिनंत्वेवेवश्यकेवलागमसिति मंत्रराजानुरूपेविधानेशकेत्तपांतत्राधिकार
न शैलागमेवैदिकेरेवमंत्रेरागमप्रोक्तानामाधारपीठस्त्रघंटाकलापेनपूजनेनकेवलमागमेश्च
गमोक्तमंत्रैरागमस्यवीजप्रदेपपूजनेवैदिकेनवागमोक्तेनागकलापेनपूजनम् एतन्नागमोक्तवीजप्र
देयोपापितत्वन्यासादिरूपमंत्रे नवरूढ्योन स्यासस्यतांत्रिकत्वेन अभ्यासावनस्तुपरिशिष्टेन्यथा
प्रकरण महत्वम् सांविज्ञाकक्षिदेवतान्तद्दाऽसान्तस्त्वं देवमेववानस्त्वं नामेनाचनवतत्वत्कोपि

सं.
टी.
४५

भक्तामन्नाचोज्जिते: षड्विंशं यमं त्रैपेयं गमात्मनि विन्यस्यात्मानेन द्रूपंभावयेत् यथा तन्मा विन्नई इत्यायन
मः इति हृदये वरेण्यं पोसावसंसाद्य इति शिरसि भर्गोदेवस्य शिखायै वषट् इति शिखायां धीमहि कव
चायहुं इति कवचमस्तु वसि धियो योनः नेत्रत्रयाय वौषट् इति नेत्रे ललाटे च विन्यस्य प्रचोदयादस्त्रा
यफट् इति करतलेनास्त्रं प्राच्यादिदशदिक्षु न्यसेदेवं गायत्र्यास: एवमप्येकेनैकेनिमहिविधिरवैदिकका
नि श्रुतमन्त्रदेवता ध्यायेदिति अनेन मत्रीमपि न्यासान्तरेण तान्त्रिकमन्त्रेषु न्यनेन प्रकता सूचिता प
केनु ब्राह्मणा समाचरत्यर्थः अनेन तेषां तत्रैवाधिकार उक्तः द्विपनः सोऽविधिरवैदिक इति तेनैकैनिविप्राः
अनेन तेषां वेदमूलकत्वं निराकृतम् हृत्तियादिविषय कता च समहेमनुक्ता विप्राणां वैदिकमात्रेऽधि
कार इति चोक्तं अन्यथा तत्राधिकारिणः प्रति न्यासानां सर्वेषां समत्वतया एकेरन्यक्रियसंगतास्यात् अत
एव प्रपंचसारे एकोनविंशपटले गायत्रीमन्त्रविधौ सन्नस्यविस्मृतदेश मे श्रवः समस्ताशिवैः समस्तांग्मा
ङ्गैः जपोऽदेन्यासं समादितरस्तनेन न्यासान्तरुक्ता एवं कृत्वा त्रिसप्त गायत्री टीतितोजपेदित्युक्तं
एवमुक्तप्रकारेण न्यासान्कृत्वादीतिनः वक्ष्यमाणकलशाभिषेकतत्त्वाणगायत्रीविषय तांत्रिकदीक्षावा
न् जपेदिति तदर्थः अनेन तादृशदीक्षावतएव न्यासपूर्वकजपे अधिकार इति नदृष्टिनस्पष्टवैदिकन्यासन
न्यासेऽधिकार इति स्पष्टमेवोक्तं तथा च सारदायां न्यासान्तरुक्ता तत्त्वलतोविधानेन भिताक्षीविजितेद्रियः
आहृतिन्नवपं प्रयुक्तो गायत्री दीक्षितो जपेदित्युक्तं अनेन परश्चरणमपि तांत्रिकमिति स्पष्टम् एवं बोधायनादि
भिरुक्तन्न्हादिविषयन्यासपूर्वकजपहोमादिकथनं तदपि शारदागमाद्युक्ततांत्रिकदीक्षावतामेवता मेधा
मितिवाच्यम् अतएवाभिप्रायास्मृतौ अयमत्रैवमर्थः पदेशोमवतोत्सप्रकम्प योऽद्ध्वर्योर्हि नारीषु छदेदे

यतश्च प्रयोजनं सैद्धान्तिनयतिवाध्यापयतिवाध्यात्मं बुद्धिनिराकर्तुं [illegible] प्रमीयते पापीयान् भवति यातनामात्र
सकृद्धंसिद्धिं वैनियाः स्वपदस्य पापत्यागे एकैकस्यावैदिकं कर्म स्वमतिनिन्दितं त्वात् ऋषिर्वेदमंत्रस्य
बोधी [illegible] वस्य माणापवप्रदेशा उपदेशानन्वधिकारस्यार्थः प्रायाणा पृष्टः ननतु कोविदनियोगर्हनिलक्ष्मासकृतः यान
यामत्वमतहत्कर्मानर्हत्वं जीवितं च पतितभक्ष्य च यानया मभिदं दुष्यामिति कोपः मन्त्राणामनयमेव नन्वेतच्चिका
लमनन्तफलत्वात् इदं हिम्यसादीनामवैदिकत्वमाह यतभागवते वैदिककर्माण्डिकोमिथ्यानिमज्जी त्रिधामतः
श्रयाणामीषते नैवैविधिनामानमवैधेदिनके नेत्र यागस्वोकाधिकारात्र यानेणवाप्या मिश्रश्च वैदिकयथा
स्मृतेत्रयाधात्मोक्तहिंसा मनन्तपि निःश्रेयसकं वैदिकमेदिनस्येतत्रिवीयतः वेदाभ्यासस्तपोज्ञानमिन्द्रियाणां
च संयमः अहिंसा गुरुसेवा च निःश्रेयसकरं परं सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतं तद्ध्यग्र्यं सर्वविद्या
नां प्राप्यते ह्यमृतं ततः सर्वेषामपि चैतेषां शुभानामिह कर्मणां किंचिच्छ्रेयस्करतरं कर्मोक्तं पुरुषं प्रति षण्णा
मेषां तु सर्वेषां कर्मणां प्रेत्य चेह च श्रेयस्करतरं ज्ञेयं सर्वदा कर्म वैदिकं इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्य
ते निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते एतदिह जन्मसाफल्यं [illegible] विशेषतः प्राप्येत तु न हन्यात्
हिंसा भवति नान्यथा यावेदवाद्याः स्मृतयो याश्च काश्चित्कुदृष्टयः सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृ
ताः उत्पद्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित् तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च पितृदेवमनुष्या
णां वेदश्चक्षुः सनातनम् अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः इत्यादि प्रमाणैः वेदाभ्यासः उपदेशकस्या
भ्यासः महाप्रयितनपः कर्मादित्यादिनमाम्नाने अत्र वेदशास्त्रानभ्यासे वेदपरः किन्तत्रेव्यागमयाहूयवो
यागस्तथा वाक्यैः सर्वेषामेषां वमा वैदिके कर्मण्येव प्रकटतरं निवृत्यमानमनेः सर्वेषामेषां वमीमिम

स्यासंगतेश्च आम्नातान्यपरत्वमाह तद्धीति पर्वोदितेत्राभ्यासतदुक्तनयश्चाटीनां वैदिकेभ्यः सांख्यकिमिश्र
इरी यायेष्ठम्भिति किमित्याह सर्वेषां लौकिकवैदिकानां उत्तरयति यत्नामिति पृथक्करणेरर्थायत एतानि वैदि
४६ कछायपाविहितानि वक्ष्यमाणानेत्रोक्तानि लौकिककर्माणि स्वफलानां वैदिकानां तेभ्यः श्रीतुज्ञायमानाना
मपिक्रमशः कालक्रमेण किंचिद्दुर्लभेन वैदिककर्मणो लाभे तत्रात्मज्ञानं भवति तस्मिन्नस्मिन् ततस्त
त्वनेके ज्ञानपर्वकरणाज्ञान अनेन निःश्रेयसं भवत्यत्र कर्म वैदिकं कर्मेति एतद्धीति आत्मज्ञानस्यापि विशेषलाभ
नेत्रत्वसूपाति यविनाम्य ज्ञानधिकारः तत्रियादेव तत्रान्यत्र वाधिकार इति सूचितं तदेवाह प्राप्यैतादृशि
एतद्धि वैदिकं लौकिकं च यद्वा हि तत्परं विपरीतं परं नत्रा किं तद्वैदिकं कर्मेत्यत आह यावेदवाह्या इति वेदान्
ला स्वेच्छया कुदृष्टयः वेदविरुद्धाश्चार्वाकादिस्मृतयः ऐहिकमात्रफलाः वेदविप्रतिपत्तत्वात्तु ताः निष्फ
लत्वे हेतुमाह उत्पद्यन्त इति न कालेनान्यन्तरेऽपि मोहार्थप्रजः सन्त्यप्रमादो त्याज्यन्ते विलीयन्ते तत्रो वेदाहुतत्व
तस्ते यथा स्मृतयः एते तो नानि उत्पत्तिविनाशशालित्वात पौरुषेयत्वेन साधितत्वाच्च एतोऽद
नमिन्यसमर्थाणि पारलौकिकफलं वाग्यन्त्रमवादी नितान्तं यल्निष्फलानि अतः केवलं वैदिकं कर्मैव
विधः तत्रियाद्व्यमिथ्यैवेत अनेन तत्रियादेरपि लौकिकफलमेवेति सूचितम् एतद्धु परीत्येन वेदस्तो
ति पितृदेवेति वेदः सर्वेषां चक्षुः तेष्वेव मनुष्याणामेवेत्यर्थः सनातनं सर्वकालिकमनादिमनन्तत्वात
त्वमेव दर्शयति अशक्यं कर्तुमशक्यं सकलं तत्कर्तुत्वात्स्वयम्भुवरूपत्वभावात् वेदतो ज्ञानपूर्वक
मेव हि सामग्राहीहिकनैकदृष्टिश्रवणाच्च बुद्धिपूर्वकृतत्वेन स्मर्यमाणत्वाच्च यस्मादिश्रुतिर्वेदा इति
अतएव अप्रमेय इयत्तया परिच्छेत्तुमशक्यम् अनन्ता वै वेदा इति श्रुते आसमन्तात् अतः सप

मध्येयोवेदादवगम्यते ॥ स्ववःसत्तविशेषोयः प्रमाणादिषुस्थितः ॥ आदिनेतिहासादिपरवृद्धिते वृनेनते
ज्ञातीनांतद्धितिपञ्चत्वेवृथाकृतत्वमविते ॥ सावृद्धियादर्थनेतेषांतत्कःफलमपितत्तपोमहात्म्यादिनश्चैति
कृतिपरयापिएवंकृतथापक्षान्हिकमार्गापविध्यापत्वेकेन्ते मार्गीत्र्येषांप्रकाराननेकमवाभङ्गतवप्रतेष
पिकारः एतच्चोक्तंमावद्भागम्यपदम् ॥ प्रत्यसंभवयोगः पांचरात्रंवेदाःपाशुपतंतथा ॥ आत्मप्रमाणमेतत्
मिनवदितव्यानिदेतभिन्निमार्गतोकेस्तत्रेषान्निर्णयः प्रमाणांतरंनिरिक्तंयमवेदाविरुद्धस्यापिभद्रविद्या
न्यमेवप्रमाणत्वात् ॥ तथापियोगाःगांगांवेदेनतविरुध्यते ॥ सांख्यः प्रमाणमितिकेकेपांचिदपिकारिसि
मितिस्तूतसंहिताकैः ॥ केषांचिदेवप्रमाणानत्सर्वेषामितिनदृष्टेः ॥ आगमानुपक्रम्य अधिकारिविभेदेन
प्रवृत्तानितसंपरदीनत्वाममनपुराणोक्तेषु ॥ एतेभ्यस्तपद्मनस्याद्धर्माभासाभिधायक ॥ नद्वन्नेद्वैस्याज
मोहनमध्ययनः ॥ धर्माभासः वेदामूलोवेदविरुद्धश्चमोहकोषयोमोहाश्चपतत्वनपातः मोहानननात
पमोदप्रवृत्तेः ॥ नर्ह्किस्मार्तेष्वपिधर्मस्तत्रोनेनाह ॥ वेदार्थवित्तमैःकार्यंस्मृतिभिर्धर्मस्तत्तुपुरा ॥ प्रयत्नेनानुति
ष्ठेत्वतंत्रिषिद्धंतवर्जयेदितिस्मृतिमिमस्यवेदार्थतथास्मृतमिमर्थः ॥ एतेनवेदमूलत्वदर्शितावेदार्थविन
मैत्र ॥ तत्राविप्रतिपत्तेश्च वेदाविरुद्धानानुष्ठानेश्रीशैवात्मार्गपामिरितिविशेषः ॥ यथा ॥ तत्र्यस्मृत्यपरिग्रहार्थप्र
नाहितानानीदितमोहोव्यवस्थितौ ॥ तथावैदिकानांवेदप्रवप्रमाणंभवत्वनातेऽत्रामि ॥ भवत्वनांमपानस्यागमाश्च
प्रमाणमितिव्यवस्थावोध्या ॥ भद्रविद्यापिमिश्रप्रमाधिकारी ॥ नेत्रेणतवैदिकेषुतस्याधिकारात् ॥ किंचब्रह्म
हीनावापिव्यनकरणाकालेसंध्यावंदनादिवत् ॥ तत्रनिषयदत्वायोग्यमेतस्याधिकारात् ॥ किंचब्रह्मवादी

शूरी
४०

प्रायश्चित्तकरणकाले संध्यावंदनादिवत् नैमित्तिकस्नानस्य मध्ये न पतनं नैमित्तिकं हुत्वा पुनः स्नाने
कर्मत्रयस्य मध्ये अधिकारवत्त्वं न मस्त्वैदिकेष्वधिकारात् वैदिकतांत्रिककर्मणोरुभयमप्यनुष्ठानं तेनैव
हीनत्वेन मन्यते वैदिकेन सह [illegible] वैदिकस्यापि तेनैव हीनत्वेन सह [illegible] तत्र वैदि
कस्यापि पुनः तांत्रिकस्य देवतानामपि [illegible] निवेद्यम् यत्तु तत्तेनैव तेन मार्गेण वैदिकमार्गे [illegible]
[illegible] तत्र भक्तिरूपत्वमत्राधिकारिणः प्रोक्तं मार्गमोहनार्थं च [illegible]
[illegible] कारणम् [illegible] पापं वेदप्रवेशं च हीनत्वमभिवृद्धिं मन्यमानः पापक
र्मिणां [illegible] कश्चित् [illegible] वैदिकात्रापि [illegible] तत्रावर्तन्ते
पराशरोक्तः [illegible] पापानन्तरं [illegible] निर्णय [illegible]
[illegible] एवं [illegible] वैदिकानां [illegible] विशेषात् [illegible] उपवासानां
[illegible] प्रायश्चित्तं [illegible] तत्क्रमम् [illegible]
[illegible] करणं च [illegible] निरूपितम् एवं
चतुर्विधं [illegible] विषयं [illegible] वामाचारेनाधिकारः [illegible]
[illegible] तथापि स्वर्गलोकात् [illegible] विशेषः [illegible]
[illegible] कालिकाप्रमाणात् [illegible] कथंचित् [illegible]
[illegible] अधिकारः [illegible] यथा [illegible]

ग्पादेवदीपने ३ निकालिकापुराणात् वामागमोपि विप्रलमद्यंमांसंनभक्षयेत् स्वकीयंपवकीयं
वानाग्राकृष्य ग्रामाणग्रसेविनिषीविक्रमसंहितातेचमारोहिलिवितलववनाव ग्राकृष्येमस्य धनदाना
हिनावशीमेमर्थः ग्रागंलपिपिलिनवकैः स्त्रवयोपस्तवेषीन वर्णिबमोविनेधर्ममविकार्षपर्णेनिषे भूत
ग्रनेपिषाचालेभवेनिवस्यगतसः इत्यगसंमहितायाम् गोवीपलिशिबवाकाच मद्यंइत्यनवद्गस्य
नेनेहेगांकदाचनेनिववनोनराव तत्रिपवेषणोवप्पहादयोविधमघहानमेव नवसुरादानम्
नव्रतपोवनविकाचान एनेनमोग्रामप्पादिस्मापनविध्याधिमधादिस्त्रीकावेनदोषइत्यपाके गात
मनदपिकाविसूदादीन्यलिमायेकाव ग्रैवर्णिकप्पेवघन्ननपाजननपोवषिकाराननूस्य चसत्ययदण
गात्तस्मैवपर्शुनिषानेप्रतिष्ठानदोषाभावकल्पनेगुरुम् नहिवामाकरीवमद्यादिविधिः नयाचा
मदवोपालकायांकोचवनपविर्व्हेहिमकम् नस्मायमर्थे योकामपिसमोगेकृयावनग्रागतो नाः
धर्मेगुणात्मेन किंतननमहादोशुभागीयपुनलमामआडपभोसोदिति नतवतमत्वंप्रवर्तनो
धेनिनरर्थेः शूनतेननमाधनाडमनीभागारेखोमगापतिनधर्मेनवकेयोगपम् नइपासनवदस्य
गासणमलाग्रापिकाविकलाभावात् वेषपसमाविकंपइत्वविपयमनसाम्यकम् ग्रासणास्यगतो
तीरमिस्रुतेषु यत्रोविभयोविपाग्रास्यागपदार्थः पीनापीत्वापुनः पीनापतित्वाधवगानले उत्थाय
वपुनः पीत्वापुनर्जन्मनविद्यतेमादितपूर्वपरमेव लोकवदहावेमघादिनोनिहनमपिपइस्पाप
ग्रामस्पादिमाधनपत्ताकाललनस्त्रीकाराबाधः मठेकृमपापकसमाणपश्वकसापविमोचनप
कालेपिस्वदस्मेव नविनाननईव्रनपद्ननेमूहादीनामपिमिद्धिप्रतिबंधात् अतएवदेवीपुराण

श्री
४८

वैश्यानुगोपवालास्तथैवद्दह्याणवमेशुच सूद्दत्त्रीश्रुविशेषेणापुलिंदस्तावेश्युच लोकान्तरगमार्गेणवामा
चारेणाभिर्दृष्टितिप्रहृष्टेनामेवतत्रापिकृतारकः लोकान्तरेगात्रय्यलोकविलत्तराणनतदंतेगोकुलेने
मथः स्त्रीशूद्रनातिभवणविशारदिस्त्रियोपि ग्राम्याण्यसाकामस्य वलिदानमपिनभवेत ग्राम्याण्य
वलिर्थंजनत्रायविदितक्रमः कृत्वाहृतमर्थमांस्नेनरेवाद्वैवभैरवम् श्रणवात्प्रपविकृतंभवतोदमंच
चवा ग्रानयेचंरदासनेनेतिकालिकापुराणात श्वतनरोमिरस्याह्याउपलब्धा कृष्णास्यापिकलेनेत्व
देशाहिकेहोगम्यत्रोक्तेः यत् श्रहेतस्तानेनिशोयोयोमासमावयावगः सपवयन्नेदेव्याश्चपिकारोप
तोमवेदितिनिमिन्दनाथसंहितायामुक्तम् ततनयथाफल नाइश्वामकर्मिमात्रेःनधिकारात तस्मात्तन
त्सह्लायपर सार्वभौमोपया गजान्तकेंदवनैतेभुवि शवधकर्माणातानान्तकेंदवनैनतयेप्यादिना
यथातस्मादावियुहाराविधुनियमः फलेनानदर्शितत्वयायोयग्रणादायैवदारमालीलोकवन्नादीनः
महादिःसमुत्पत्तिकारीनितरथेः वृक्षतःसार्वभौमायत्रेमाधोपवृत्तत्वतीनपरनतेनत्तत्त्वरूदाव
गणमंति तानितनपक्रम्य पारथकर्मणावलमाइयोविष्ठाभवेयुदि क्रियातेतमदाइत्वंभकोविाहर
दीनवत् यथेष्टाचरणेतस्यानामालंकनेविहिष्मेन इत्यभिपुक्तोक्तेः सनत्कुमारसंहितायामप्युक्तम् वाय
प्रानाकर्नेभाकनेत्याद्यवाद्यजातिभिः साचवन्दपदानस्यमेदिकार्यकमाधनान नकर्नेकमस्मिपुधिर
निषेधः मदारकमेथ्याचाह्रांत वाधानात वाधप्रत्तावतः कौलाः तपणाञ्चकपालिनः हिंसवाथेन
हासावामकाकंतुवारितः शेनतायधनपरावैदिकाश्चमवारितः सौकन्नकायवरूपेनोशिश्रुलोकश्चम
देहेन पतिहामादिभैरवयामलादितंत्रपामाण्यवादिनः तपणाहपःदूनोषाशप्रधानाः नतवादिनः

श्रीविद्याप्रधानत्वेनोक्ता विमर्शिनेत्र यामाराण्यवासिनः श्रुतेरागमानेदेवतानामाह्ल्यावमेधानरूपम यदा
वाह्यमानाबाधकत्वेकाश्ज्ञावाकरोपलक्षवलाभान श्रुतेरागमानेवैदिकमेननेदगमानगधने जीवन्मुक्त
त्वस्यमलपवेमर्कः ज्ञाप्यप्राणानुपक्रम्य मिश्रकेकौलमार्गे चपरिस्याः संहिता करीनौ यवववनाय कौल
मार्गोवामाचारप्रधानोमार्गः मिश्रके यद्बाह्यदिविभयमार्गेकथनम एवेनालराधनपरालि
कोलमार्गोक्तानर्थागपरामित्यपालम ननत्रोकमार्गमन्त्रप्राणालिमवैष्णमास्यनकथनात वैदिन
क्षिपिनज्ञाणिनोनिकंधनत्युक्तन तन्त्रानिष्ठत्वणवेदान्वैदिकाधनत्पयोरनपिननदपिकार्याणानि
नकनेवेमलमवम स्वधर्मे निधनंश्रेयः परधर्मो भयावहः इत्युक्तेः एवंचवामाचारप्रधानोमार्गोपि

परिनष्ठानागड्डावीएमतेपाट्वेदिका देवृवाच वस्यार्थेनेलयमभपनयावकुलनेदन १ मन
त्वम्पिनासर्वेपनिनष्ठाद्दोमनन माकेरपउवाच नेनावभेदपोरामननविभेयपत्स्नकानि॥

निरुपण वेदाप्यवनग्रहनयद्वन एवंचमहविद्याभांकैवलमार्गप्रधानत्वेनाधिकारः कुलगोलकादी
नामकरामामहादीनांचनवनाश्विकारः विप्राद्विज्ञानकुलगोलकादिग्रामार्णव प्रहेनयामिनीत्व
सर्वेवर्णोहृत्मानव: निरूमेयामिनीन्त्रेमसर्वेवर्णाः इथकइथक इत्यादिवचनासिकंद्रदोनामयुनयनो
त्वाहिस्ताभिलाव ननदूंतमानस्यगोणानंनदूंताक्ष्मच पनदृधिणाएमेवमोआमनाणोमार्यक्ल सोवान
त्वकलाचावेविषमधनदूध्यमीनिपद्धनिसाधनेकाः तत्रिपवेनपणेध्रुवदिकतांत्रिकवैदिके वापि
कारानि निननगाह्यास्वर्मेतनवलिदाचनयामेविहरु नयानमनवाधावाणाद्यपिप्पटककुलगोलकादी
नामेवलिगावकाहिधावणानुपक्रम्य विप्रस्पनाहृगाईत्वान्यायपिन्नदीरिनम श्रुहपमेवनानो

दुर्गा ५८

दिलिंगत्वकारित्पारवाभिमिति यमलोकेः एतदेवैकधनयत्नपरैः कलितानाएव मनुपत्वंमाप्त तथापु
पलभ्यते नाम्रोषिवेश्माण्यकाएटेभिक्स्पथवाभावात्तनतार्पिता: त्रिगुणादिणारमामपिरोवाधामेवि
षयप्रवावषमादिदोत्तिनसैवेति सतमेदिनांदामप्रमस्याधगानतेमानेवेदिकेरवमनेपमकल्प
सक्का यहत्तमनुसराम: ९ प्रसन्नामिमिति क्रियाविशेषणं देव्युवाच यदिस्मताई कुलनंदनोतिवश्य
बोधने ज्ञानापित्वंन प्रशस्तत्वात ९ मनरीति प्राप्यतोस्मीक्रियता तत्वाप्यमाने मार्कंडेयउवाच

भूत्वैवव्वनिर्जनरासंद्दनमानुवलेवलात सोपिवैश्यस्ततोज्ञानंवव्रेनिर्विएमानसः ११ ममे
त्यहमितिप्राज्ञ: संगविच्युतिकारकं देव्युवाच स्वल्पैरहोभिर्नृपतेस्वराज्यंप्राप्स्यतेभवान् १२
हत्वारिपूनस्खलितंतवतत्रभविष्यति मृतश्चभूय: संप्राप्यजन्मदेवाद्विवस्वत: १३ सावर्णिको
मनुर्नामभवान्भुविभविष्यति वैश्यवर्यत्वयायश्चवरोस्मत्तोभिवांछित: १४ तंप्रयच्छामिसंसि
द्धेतवज्ञानंभविष्यति मार्कंडेयउवाच इतिदत्वातयोर्देवीयथाभिलषितंवरम् १५

ततःस्वतनराई श्रविभेत्रित्रिविस्माषि ९ मूत्वैवच मृतापि मृतिनजन्मप्रापि हत्वाचुवलापिनिवासाविशे
षाणं ज्ञानेतत्वज्ञानम् निर्विएमानसः संसाराहिवकमानम: १० ममेत्यहमितिय: संगारत्तहिच्युतिसत्रा
चाकारकमिति ज्ञानविशेषणं समासफलादसः प्राप्तस्यमनकौल्थानिवांछितमत्यर्थ देव्युवाच स्वल्पैरिति
स्वराज्यमितिशेषः १२ हत्वेति तत्राराज्येतव्यास्खलितंनभविष्यति उतराधंन्नुतरान्वयि १५ सावर्णिकर
ति यहावक्रनाम तदुपलक्षितोमनुरित्यर्थ: वेश्यापादिउतरान्वयि प्रस्मत्तइतिबहुवचनस्वसमा

दुं टी ५०

वोऽभ्यंघातकम् ११ तमिति सेमिद्धेममृत्युं तादृशं चवर्णी ज्ञानेद्यमज्ञाने मार्कंडेयउवाच इतीति
सप्तम् १६ बभूवेति देव्या इत्यपादानेपंचमी २ सूर्यादिति सावर्णिर्भविता मनुरित्यस्य पुनराहेति
वंद्यमाणाकामायनीमंत्रात् श्रुतेमनुरित्यनेन सावर्णि इत्यादस्य सावर्णिर्भविता मनुरित्यंतोपमदा
मात्मामत्रयतिस्वयातिनडकेनल्लीनेत्रे सम्पगाढद्दिश्यिता मेयज्जन्मकर्मावलिज्ञानिः एतान्दिज

बभूवेतिर्दिजास्यवोभक्त्यातायामभिषुता एवं देव्यावरंल
ब्ध्वासुरथः क्षत्रियर्षभः ९ सूर्याज्जन्मसमासाद्य सावर्णि
र्भविता मनुः इति मार्कंडेयपुराणे सावर्णिकेमन्वंतरे दे
वीमाहात्म्ये सुरथवैश्ययोर्वरप्रदानो नाम त्रयोदशोऽध्यायः १३

त्यादानर्ज्ञात्वाश्रुधीयानोनरःसदा विघ्ननिखिलंमायासम्यक्ज्ञानंसमश्नुते सर्वाःसंपदमाप्नो
तिफलेनानिसकलापदइति हिज्ञमृत्वानज्ञात्वमनेनापस्यावाचनदर्पणमित्यादिकीर्तकोकप्रकारे
णज्ञानंसूचितमितिसर्वंश्लिष्टम् इति कालोपनामकश्रीशिवभट्टसुतसतीगर्भजनागोजीभ
ट्टकृतेसप्तशतीव्याख्यानेत्रयोदशोऽध्यायः १३ शुभंभूयात् ॥ ॥